# पाठ – 6.

# गृहं शून्यं सुतां बिना

---

**अभ्यासः**

**Q1. अधोलिखितानां प्रश्नानाम् उत्ताराणि संस्कृत भाषया लिखत–**

**(क) दिष्ट्या का समागता?**

**(ख) राकेशस्य कार्यालये का निश्चिता?**

**(ग) राकेशः शालिनीं कुत्र गन्तुं कथयति?**

**(घ) सायंकाले भ्राता कार्यालयात् आगत्य किम् करोति?**

**(ङ) राकेशः कस्याः तिरस्कारं करोति?**

**(च) शालिनी भ्रातरम् कां प्रतिज्ञां कर्तुं कथयति?**

**(छ) यत्र नार्यः न पूज्यन्ते तत्र किम् भवति?**

**Answer.** (क) दिष्ट्या शालिनी समागता।

(ख) राकेशस्य कार्यालये महत्वपूर्णा गोष्ठी निश्चिता।

(ग) राकेशः शालिनीं मालया सह चिकित्सिकां प्रति गन्तुं कथयति।

(घ) सायंकाले भ्राता कार्यालयात् आगत्य हस्तपादादिकं प्रक्षाल्य वस्त्राणि परिवर्त्य पूजागृहं च गत्वा द्वीपं प्रज्वाल्य भवानीस्तुतिं करोति।

(ङ) राकेशः सृष्टेः उत्पादिन्याः शक्त्याः तिरस्कारं करोति।

(च) कन्यायाः रक्षणे, तस्याः पाठने च तदीयः भ्राता दत्तचित्तः तिष्ठेत् इति प्रतिज्ञां कर्तुं शानिली भ्रातरं कथयति।

(छ) यत्र नार्यः न पूज्यन्ते तत्र सर्वाः क्रियाः अफला भवन्ति।

**Q2. अधोलिखितपदानां संस्कृतरूपं (तत्सम रूपं) लिखत–**

**(क) कोख**

**(ख) साथ**
**(ग) गोद**

**(घ) भाई**

**(ङ) कुआँ**

**(च) दूध**

**Answer.** (क) क्रोडः

(ख) सह

(ग) कुक्षिः

(घ) भ्राता

(ङ) कूपः

(च) पयः

**Q3. उदाहरणमनुसृत्य कोष्ठकप्रदत्तेषु पदेषु तृतीयाविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत–**

**(क) मात्रा सह पुत्री गच्छति (मातृ)**

**(ख) ................ विना विद्या न लभ्यते (परिश्रम)**

**(ग) छात्र: ................ लिखति (लेखनी)**

**(घ) सूरदासः ................ अन्ध: आसीत् (नेत्र)**

**(ङ) सः ................ साकम् समयं यापयति। (मित्र)**

**Answer.** (क) मात्रा सह पुत्री गच्छति।

(ख) परिश्रमेण विना विद्या न लभ्यते।

(ग) छात्रः लेखन्या लिखति।

(घ) सूरदासः नेत्राभ्याम् अन्धः आसीत्।

(ङ) स मित्रेण साकं समयं यापयति।

**Q4. 'क' स्तम्भे विशेषणपदं दत्तम् 'ख' स्तम्भे च विशेष्यपदम्। तयोर्मेलनम् कुरुत-**

| 'क' | स्तम्भः | 'ख' | स्तम्भः |
|---|---|---|---|
| (1) | स्वस्था | (क) | कृत्यम् |
| (2) | महत्वपूर्णा | (ख) | पुत्री |
| (3) | जघन्यम् | (ग) | वृत्तिः |
| (4) | क्रीडन्ती | (घ) | मनोदशा |
| (5) | कुत्सिता | (ङ) | गोष्ठी |

**Answer.**

| | |
|---|---|
| स्वस्था | मनोदशा |
| महत्वपूर्णा | गोष्ठी |
| जघन्यं | कृत्यम् |
| क्रीडन्ती | पुत्री |
| कुत्सिता | वृत्तिः |

**Q5. अधोलिखितानां पदानां विलोमपदं पाठात् चित्वा लिखत-**

**(क) श्वः**

**(ख) प्रसन्ना**

**(ग) वरिष्ठा**

**(घ) प्रशंसितम्**

**(ङ) प्रकाशः**

**(च) सफलाः**

**(छ) निरर्थकः**

**Answer.** (क) ह्यः

(ख) विमना

(ग) कनिष्ठा

(घ) तिरस्कृतम्

(ङ) अन्धकारः

(च) विफलाः

(छ) सार्थकः

**Q6. रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत-**

**(क) प्रसन्नतायाः विषयोऽयम्।**

**(ख) सर्वकारस्य घोषणा अस्ति।**

**(ग) अहम् स्वापराधं स्वीकरोमि।**

**(घ) समयात् पूर्वम् आया सं करोषि।**

**(ङ) अम्बिका क्रोडे उपविशति।**

**Answer.** (क) कस्याः विषयोऽयम्?

(ख) कस्य घोषणा अस्ति?

(ग) अहं किं स्वीकरोमि?

(घ) कस्मात् पूर्वम् आयासं करोषि?

(ङ) अम्बिका कुत्र उपविशति?

**Q7. अधोलिखिते सन्धिविच्छेदे रिक्त स्थानानि पूरयत-**

| यथा– | नोक्तवती | | न | | उक्तवती |
|---|---|---|---|---|---|
| | सहसैव | = | सहसा | + | ........... |
| | परामर्शानुसारम् | = | ........... | + | अनुसारम् |
| | वधार्हा | = | ........... | + | अर्हा |
| | अधुनैव | = | अधुना | + | ........... |
| | प्रवृत्तोऽपि | = | प्रवृत्तः | + | ........... |

**Answer.** सहसैव = सहसा + एव परामर्शानुसारम् = परामर्श + अनुसारम् वधार्हा = वध + अर्हा अधुनैव = अधुना + एव प्रवृत्तोऽपि = प्रवृत्तः + अपि